च्छेदप्रसङ्गात्। एतेन “कार्य्यत्वस्य विपक्षवृत्तिहतये सम्भाव्यतेऽतीन्द्रियः कर्त्ता चेद्व्यतिरेकसिद्धिविधुरा व्याप्तिः कथं सिध्यति। दृश्योऽथ व्यतिरेकसिद्धिमनसा कर्त्ता समाधीयते तस्याद्यापि तदा दृशादिकमिति व्यक्तं विपक्षेक्षणमिति” निरस्तम्। ननु यदि कर्तृमात्रव्यतिरेकपरिहाराद्दृश्यकर्तृसिद्धिस्तदा वह्निमात्रव्याप्तधूमाददृश्यजाठर्य्यसिद्धिरपि स्यात्, न स्यात् अदृश्यवह्नेर्धूमानुपपत्तेः दृश्यस्यैव तत्र हेतुत्वात्। ननु ज्ञानेच्छाप्रयत्नत्रयव्यतिरेकान्न कार्यव्यतिरेकः किन्तु एकैकव्यतिरेकात् तथा च व्यर्थविशेषणत्वे विशिष्टव्यतिरेको न हेतुव्यतिरेकव्याप्य इति न हेतोर्विशिष्टसिद्धिः साध्याभावव्यापकाभावप्रतियोगिन एव साध्यगमकत्वादिति चेन्न यत एकैकव्यतिरेकात् कार्यव्यतिरेकोऽतएव कार्यत्वादेरेकैकं सिध्यत्त्रयमपि सिध्यति। आर्यस्तु समाजः।

स्यादेतत् अशरीरसर्वज्ञनित्यज्ञानादिमान् कर्त्ता पक्षे विवक्षितः घटादौ च कार्यत्वस्य तद्विपरीतकर्तृसहचाराद्दर्शनाद्विशेषविरुद्धत्वमिति न हेतोर्विवक्षितसाध्यविपरीतसहचारमात्रस्यादूषणत्वात् अन्यथानुमानोच्छेदप्रसङ्गात्। न चानित्यज्ञानासर्वज्ञशरीरकर्तृत्वेन समं कार्यत्वस्य व्याप्तिरस्ति येन तद्विपरीतसाधने विरुद्धं स्यात् तादृशव्याप्तिश्च त्वया मया वा नाङ्गीक्रियते अङ्कुरादौ योग्यानुपलम्भेन शरीरिकर्तृत्वाभावात्। अथ यथादर्शनबलप्रवृत्तव्याप्त्याऽनित्यज्ञानादिमान् कर्त्तोपनेयः पक्षधर्मतया च नित्यज्ञानादिमान् तथा चोपनेयविशेषयोर्विरोधेन व्याप्तिपक्षधर्म्मतयोर्विरोधात् परस्परसहकारिताविरहान्नानुमानविशेषविरोधादिति चेन्न अनित्यज्ञानादिकर्तृजन्यत्वेन व्याप्त्यभावात् ज्ञानादिमत्कर्तृजन्यत्वव्याप्तेः पक्षधर्मताबलेभ्यः विशेषाविरोधात् केवलाया व्याप्तेश्च पक्षधर्मतायाश्च पृथगुपनायकत्वाभावाच्च एकवैयर्थ्यप्रसङ्गाच्च तथा च निरपेक्षतायां विशेषानुपस्थापनादेव न विरोधज्ञानं सापेक्षतादशायाञ्च सहोपलम्भादेव विरोधप्रतियोगिनोः सिद्ध्यसिद्धिभ्यां विरोधभावज्ञानाभावाच्च। लिङ्गविशेषेण साध्यविशेषेण च एव विरोधे च विशेषविरोधः यथा चन्दनप्रभववह्निमानयं सुरभिधूमवत्त्वात्। ननु ज्ञानत्वनित्यत्वयोः कर्तृताशरीरित्वयोश्च परस्परविरुद्धत्वेन एकधर्म्यसमावेशात् कथं नित्यज्ञानादिकर्तृसिद्धिः, न उपसंहारस्थानाभावात्। तथाहीश्वरे तद्बुद्धौ चाशरीरित्वकर्तृबुद्धिनित्यत्वे च उपसंह्रियमाणे विरुद्धे, न तु स्वाश्रयस्थिते उभयोच्छेदप्रसङ्गात्, न चेश्वरस्तद्बुद्धिर्वोपस्थिता उपस्थितौ वा धर्मिग्राहकमानेन तयोर्विरोधापहारात् अनुपस्थिते च तयोर्विरोधज्ञानमकिञ्चित्करमेव अस्मदादिबुद्धौ व्योमादौ कुविन्दे मुक्तात्मनि च उपस्थिते विरोधोपसंहारात्, बुद्धिनित्यत्वयोः कर्तृत्वाशरीरित्वयोरनधिगमेऽपि ईश्वरेऽशरीरिकर्तृत्वनित्यज्ञानादिसिद्धिरप्रत्यूहैव। अतएव नित्यत्वावयवत्वयोर्विरोधज्ञानमकिञ्चित्करमेवेति परमाणुसिद्धिः। ईश्वरतद्बुद्ध्यादिकं तर्कितमिति चेन्न तर्कस्य प्रसञ्जनस्य संशयस्य वाऽज्ञानेऽसम्भवात्। स्यादेतत् घटादौ कृतिसाध्यता हस्तादिव्यापारादिद्वारैव न तु साक्षात्, न च पितापुत्रयोरेकघटसाधकत्वमिव प्रयत्नहस्तादिव्यापारयोः साधकत्वं वाच्यं घटार्थं हस्तव्यापारादिना व्याप्रियमाणकुलालसमीपदेशस्थस्य हस्तादिव्यापारशून्यस्य तद्घटकर्तृत्वापत्तेः न च हस्तादिव्यापारवत्ताऽशरीरस्य सम्भवति अन्यादृशी च कृतिसाध्यता न दृष्टा, शरीरतद्व्यापारौ चाङ्कुरे बाधिताविति कर्त्तुरपि बाधः। अन्यथा तदनुमानात् क्षेत्रज्ञ एव कर्त्ता क्षितौ च अनुमीयते बुद्ध्यादिमत्परात्मनोर्योग्यानुपलब्धिबाधाभावात् शरीरव्यापारद्वारैव क्षेत्रज्ञस्य हेतुत्वात् शरीरव्यापारस्य चाङ्कुरे बाधात् बाधितइति चेत्तर्हि कर्त्तृमात्रस्यापि तद्द्वारैव चेष्टेतरकार्य्यकर्तृत्वदर्शनात् तत्रापि कर्तृमात्रे बाधोऽपि। एवञ्च कृतिसाध्यत्वे शरीरव्यापारजन्यत्वं प्रयोजकमिति स एवोपाधिः। एवं ज्ञानेच्छयोरपीच्छाकृतिद्वारा जनकत्वमिति कथं द्वारं विना क्षित्यादौ जनकत्वमिति। उच्यते। जन्यमात्रे हस्तादिजनककृतित्वेन न जनकत्वं चेष्टायां क्षित्यादौ च व्यभिचारात् घटादौ च तथा जनकत्वमिति जन्यमात्रे कृतिमात्रस्य जनकत्वविरोधिविशेषयोर्जन्यजनकभावे बाधकं विना सामान्ययोरपि तथाभावनियमात्। न हि विशेषे विशेषप्रयोजकत्वेन सामान्यप्रयोजकत्वविरोधः। चेष्टेतरकार्य्ये शरीरद्वारैव कृतेर्हेतुत्वात् तेन विना क्षित्यादौ न कृतिसाध्यत्वमिति चेत् चेष्टेतरकार्यमात्रे शरीरव्यापारकृतित्वेन जनकत्वे क्षित्यादौ व्यभिचारात्। किन्तु तद्विशेषघटादौ इत्युक्तत्वात्। न चैवमामवातजडीकृतकलेवरस्य प्रयत्नादेव घटोत्पत्तिः स्यात् हस्तादिव्यापारं विनैव कृतेर्हेतुत्वादिति वाच्यं घटे कृतौ हस्तादिव्यापारस्यापि हेतुत्वात्। यदुक्तं क्षेत्रज्ञ एव कुतो नानुमीयत इति तत्र हस्तादिव्यापारककृतिमान् यदि क्षेत्रज्ञोऽभिमतः तदा हस्तादिव्यापारस्याङ्कुरे योग्यानुपलब्धिबाधात् अथ हस्तादिव्यापाररहितकृतिमानभिमतस्तदोमित्युच्यते स एव